कृष्णा० कृतेवर्षशतैरपि ॥ फलंप्राप्नोतिविपुलंकलौसंकीर्त्यकेशवं ॥६२॥ क्षीयतेतुयदाधर्मःप्राप्तेघोरेकलौयुगे ॥ त महा०
॥३॥ दानकीर्तयेत्कश्चिन्मुक्तिदंदेवमच्युतं ॥६३॥ अवशेनापियन्नाम्निकीर्तितेसर्वपातकैः ॥ पुमान्विमुच्यतेस
द्यःसिंहत्रस्तैर्मृगैरिव ॥६४॥ नारायणेतिमंत्रोस्तिवागस्तिवशवर्तिनी ॥ तथापिनरकेघोरेपतंतीत्येतदद्भुतं
॥ ६५ ॥ आर्ताविषण्णाशिथिलाश्चभीताघोरेषुचव्याधिषुवर्तमानाः ॥ संकीर्त्यनारायणशब्दमात्रंविमुक्त
दुःखाःसुखिनोभवंति ॥६६॥ कौशिकः ॥ सकृदुच्चरितंयैस्तुकृष्णेतिनविशंतिते ॥ गर्भागारगृहंमातुर्यम
लोकंचदुःसहं ॥६७॥ क्वनाकपृष्ठगमनंपुनरावृत्तिलक्षणं ॥ क्वजपोवासुदेवेतिमुक्तिबीजमनुत्तमं ॥ ६८ ॥
बुद्ध्याबुद्ध्वाभ्यसेदेतद्धरिरित्यक्षरद्वयं ॥ स्मरणात्कीर्तनाद्यस्यनपुनर्जायतेभुवि ॥६९॥ हेजिह्वेममनिःस्नेहे
हरिंकिंनानुभाषसे ॥ हरिंवदस्वकल्याणिसंसारोदधिनौर्हरिः ॥ ७० ॥ असारेखलुसंसारेसारात्साररतरोह
रिः ॥ पुण्यहीनानविंदंतिसारंगाश्चयथाजलं ॥७१॥ कुरुक्षेत्रेणकिंतस्यकिंकाश्यापुष्करेणकिं ॥ जिह्वाग्रे
वर्ततेयस्यहरिरित्यक्षरद्वयं ॥७२॥ ब्रह्मा ॥ असारेखलुसंसारेसारमेकंनिरूपितं ॥ समस्तलोकनाथस्यसा ॥७६०॥
रमाराधनंहरेः ॥ ७३ ॥ साजिह्वायाहरिंस्तौतितच्चित्तंयत्तदर्पणं ॥ तावेवकेवलौश्लाघ्यौयौतत्पूजाकरौ

करौ ॥ ७४ ॥ यस्तुविष्णुपरोनित्यंदृढभक्तिर्जितेंद्रियः ॥ स्वगृहेपिवसन्यातितद्विष्णोःपरमंपदं ॥७५॥
शंकरः ॥ साधुसाधुमहाभागसाधुदानवनाशन ॥ यन्मांपृच्छसिधर्मज्ञकेशवाराधनंप्रति ॥७६॥ निमि
षंनिमिषार्धंवामुहूर्तमपिभार्गव ॥ नादग्धाशेषपापानांभक्तिर्भवतिकेशवे ॥ ७७ ॥ किंतेनमनसाकार्यंयन्न
तिष्ठतिकेशवे ॥ मनोमुक्तिफलावाप्तौकारणंसुप्रयोजितं ॥७८॥ रोगोनामनसाजिह्वाययानस्तूयतेहरिः ॥
गर्तौनामनतौकर्णौयाभ्यांतत्कर्मनश्रुतं ॥७९॥ नूनंतत्कंठशालूकमथवाप्युपजिह्विका ॥ रोगोनामनसा
जिह्वायानवक्तिहरेर्गुणान् ॥८०॥ भारभूतैःकरैःकार्यंकिंतस्यनृपशोर्द्विज ॥ यैर्हिनक्रियतेविष्णोर्गृहसंमा
र्जनादिकं ॥८१॥ चरणौतौतुसफलौकेशवालयगामिनौ ॥ तेचनेत्रेमहाभागयाभ्यांसंदृश्यतेहरिः ॥८२॥
किंतस्यचरणैःकार्यंवृथासंचरणैर्द्विज ॥ यैर्हिनव्रजतेजंतुःकेशवालयदर्शने ॥८३॥ वेदवेदांगविदुषांमुनीनां
भावितात्मनां ॥ ऋषित्वमपिधर्मज्ञविज्ञेयंतत्प्रसादजं ॥८४॥ विचित्ररत्नपर्यंकेमहाभोगेचभोगिनः ॥ रमं
तेनाकिरामाभिःकेशवस्मरणात्फलं ॥८५॥ अश्वमेधसहस्राणांयःसहस्रंसमाचरेत् ॥ नासौतत्फलमाप्नोति
तद्भक्तैर्यदवाप्यते ॥८६॥ रेरेमनुष्याःपुरुषोत्तमस्यकरौनकस्मान्मुकुलीकुरुध्वं ॥ क्रियाजुषांकोभवतांप्रया

१२८

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ॐ॥ अर्चितःसंस्मृतोध्यातःकी
र्तितःकथितःश्रुतः॥योददात्यमृतत्वंहिसमांरक्षतुकेशवः ॥१॥ तापत्रयेणसंतप्तंयदेतदखिलंजगत् ॥ वक्ष्या
मिशांतयेतस्यकृष्णामृतमहार्णवं ॥२॥ तेनराःपशवोलोकेकिंतेषांजीवनेफलं ॥ यैर्नलब्धाहरेर्दीक्षानार्चि
तोवाजनार्दनः ॥ ३ ॥ संसारेस्मिन्महाघोरेजन्मरोगभयाकुले ॥ अयमेकोमहाभागःपूज्यतेयदधोक्षजः
॥४॥ सनामसुकृतीलोकेकुलंतेनाभ्यलंकृतं ॥ आधारःसर्वभूतानांयेनविष्णुःप्रसादितः ॥५॥ यज्ञानांतप
सांचैवशुभानांचैवकर्मणां ॥ तद्विशिष्टफलंनृणांसदैवाराधनंहरेः ॥६॥ कलौकलिमलध्वंसिसर्वपापहरंहरिं ॥
येर्चयंतिनरानित्यंतेपिवंद्यायथाहरिः ॥७॥ नास्तिश्रेयस्तमंनृणांविष्णोराराधनान्मुने ॥ युगेस्मिंस्तामसे
लोकेसततंपूज्यतेनृभिः ॥८॥ अर्चितेसर्वदेवेशेशंखचक्रगदाधरे ॥ अर्चिताःसर्वदेवाःस्युर्यतःसर्वगतोहरिः
॥९॥ स्वर्चितेसर्वलोकेशेसुरासुरनमस्कृते ॥ केशवेकंसकेशिघ्नेनयातिनरकंनरः ॥ १० ॥ सकृदभ्यर्च्यगो
विंदंबिल्वपत्रेणमानवः ॥ मुक्तिभागीनिरातंकीविष्णुलोकेचिरंवसेत् ॥ ११॥ शंकरः ॥ सकृदभ्यर्चितोये
नदेवदेवोजनार्दनः ॥ यत्कृतंतत्कृतंतेनसंप्राप्तंपरमंपदं॥१२॥सकृदभ्यर्चितोयेनहेलयापिनमस्कृतः ॥ सया

कृष्णा० तिपरमंस्थानंयत्सुरैरपिदुर्लभं ॥१३॥ नारदः ॥ समस्तलोकनाथस्यदेवदेवस्यशार्ङ्गिणः ॥ साक्षाद्भगवतो महा०
॥ १ ॥ विष्णोःपूजनंजन्मनःफलं ॥ १४ ॥ पुलस्त्यः ॥ भक्त्यादूर्वांकुरैःपुंभिःपूजितःपुरुषोत्तमः ॥ हरिर्ददातिहि
फलंसर्वयज्ञैश्चदुर्लभं ॥१५॥ विधिनादेवदेवेशःशंखचक्रधरोहरिः ॥ फलंददातिसुलभंसलिलेनापिपूजितः
॥१६॥ नरकेपच्यमानस्तुयमेनपरिभाषितः ॥ किंत्वयानार्चितोदेवःकेशवःक्लेशनाशनः ॥ १७ ॥ धर्मः ॥
द्रव्याणामप्यभावेतुसलिलेनापिपूजितः ॥ योददातिस्वकंस्थानंसत्वयाकिंनपूजितः ॥ १८ ॥ नारसिंहोहृ
षीकेशःपुंडरीकनिभेक्षणः ॥ स्मरणान्मुक्तिदोनृणांसत्वयाकिंनपूजितः ॥१९॥ ब्रह्मा ॥ गर्भस्थितामृता
वापिमुषितास्तेसुदूषिताः ॥ नप्राप्तायैर्हरेर्दीक्षासर्वदुःखविमोचनी ॥ २०॥ मार्कंडेयः ॥ सकृदभ्यर्चितोये
नदेवदेवोजनार्दनः ॥ यत्कृत्यंतत्कृतंतेनसंप्राप्तंपरमंपदं ॥२१॥ धर्मार्थकाममोक्षाणांनान्योपायस्तुविद्यते ॥
सत्यंब्रवीमिदेवेशहृषीकेशार्चनादृते ॥२२॥ तस्ययज्ञवराहस्यविष्णोरमिततेजसः ॥ प्रणामंयेप्रकुर्वंतितेषा ॥७५८॥
मपिनमोनमः ॥२३॥ मरीचिः ॥ अनाराधितगोविंदैर्नरैःस्थानंनृपात्मज ॥ नहिसंप्राप्यतेश्रेष्ठंतस्मादारा
धयाच्युतं ॥२४॥ अत्रिः ॥ परःपराणांपुरुषस्तुष्टोयस्यजनार्दनः ॥ सचाप्नोत्यक्षयंस्थानमेतत्सत्यंमयोदि

तं ॥२५॥ अंगिराः ॥ यस्यांतःसर्वमेवेदमच्युतस्याव्ययात्मनः ॥ तमाराधयगोविंदंस्थानमग्र्यंयदीच्छसि
॥२६॥ पुलस्त्यः ॥ परंब्रह्मपरंधामयोसौब्रह्मसनातनं ॥ तमाराध्यहरिंयांतिमुक्तिमप्यतिदुर्लभां ॥२७॥ पु
लहः ॥ ऐंद्रमिंद्रःपरंस्थानंयमाराध्यजगत्पतिं ॥ प्रापयज्ञपतिंविष्णुंतमाराधयसुव्रत ॥२८॥ प्राप्नोत्याराधिते
विष्णौमनसायद्यदिच्छति ॥ त्रैलोक्यांतर्गतंस्थानंकिमुलोकोत्तरोत्तरं ॥२९॥ येस्मरंतिसदाविष्णुंशंखचक्र
गदाधरं ॥ सर्वपापविनिर्मुक्ताःपरंब्रह्मविशंतिते ॥३०॥ ततोनिरुद्धंदेवेशंप्रद्युम्नंचततःपरं ॥ ततःसंकर्षणं
देवंवासुदेवंपरात्परं ॥३१॥ वासुदेवात्परंनास्तिइतिवेदांतनिश्चयः ॥ वासुदेवंप्रविष्टानांपुनरावर्तनंकुतः ॥
॥३२॥ आत्रेयः ॥ योयानिच्छेन्नरःकामान्नारीवावरवर्णिनी ॥ तान्समाप्नोतिविपुलान्समाराध्यजनार्दनं
॥३३॥ ब्रह्मा ॥ बाहुभ्यांसागरंतर्तुंकइच्छतिपुमान्भुवि ॥ वासुदेवमनाराध्यकोमोक्षंगंतुमिच्छति ॥३३॥
कौशिकः ॥ अनाराधितगोविंदायेनरादुःखभागिनः ॥ आराध्यवासुदेवंस्युर्नित्यानंदैकभागिनः ॥३४॥
शंकरः ॥ कृतेपापेऽनुतापोवैयस्यपुंसःप्रजायते ॥ प्रायाश्चित्तंतुतस्योक्तंहरिसंस्मरणंपरं ॥ ३५॥ (नाम्नो
स्तियावतीशक्तिःपापनिर्हरणेहरेः ॥ तावत्कर्तुंनशक्नोतिपातकंपातकीजनः) ॥३६॥ ब्रह्मा ॥ नह्यपुण्यव

कृष्णा० तांलोकेमूढानांकुटिलात्मना ॥ भक्तिर्भवतिगोविंदेस्मरणंकीर्तनंतथा ॥३७॥ तदैवपुरुषोमुक्तोजन्मदुःख महा०
॥ २ ॥ जरादिभिः ॥ जितेंद्रियोविशुद्धात्मायदैवस्मरतेहरिं ॥३८॥ प्राप्तेकलियुगेघोरेधर्मज्ञानविवर्जिते ॥ नक
श्चित्स्मरतेदेवंकृष्णंकलिमलापहं ॥३९॥ नकलौदेवदेवस्यजन्मदुःखापहारिणः ॥ करोतिमर्त्योमूढात्मास्मर
णंकीर्तनंहरेः ॥ ४० ॥ येस्मरंतिसदाविष्णुंविशुद्धेनांतरात्मना ॥ तेप्रयांतिभयंत्यक्त्वाविष्णुलोकमनामयं
॥४१॥ गर्भजन्मजरारोगदुःखसंसारबंधनैः ॥ नबाध्यतेनरोनित्यंवासुदेवमनुस्मरन् ॥ ४२ ॥ यममार्गंम
हाघोरंनरकाणियमंतथा ॥ स्वप्नेपिनैवपश्येतयःस्मरेद्गरुडध्वजं ॥४३॥ हृदिरूपंमुखेनामनैवेद्यमुदरेहरेः ॥
पादोदकंचनिर्माल्यंमस्तकेयस्यसोच्युतः ॥४४॥ गोविंदस्मरणंपुंसांपापराशिमहाचलं ॥ असंशयंदहत्या
शुतूलराशिमिवानलः ॥४५॥ अगस्त्यः ॥ स्मरणादेवकृष्णस्यपापसंघातपंजरः ॥ शतधाभेदमायातिगि
रिर्वज्रहतोयथा ॥४६॥ कृष्णेरताःकृष्णमनुस्मरंतितद्भाविताস्तद्गतमानसाश्च ॥ भिन्नेपिदेहेप्रविशंतिकृष्णं
हविर्यथामंत्रहुतंहुताशे ॥४७॥ साहानिस्तन्महच्छिद्रंसाचांधजडमूकता ॥ यन्मुहूर्तंक्षणंवापिवासुदेवोनार्चि ॥७५१॥
त्यते ॥४८॥ नारायणोनामनरोनराणांप्रसिद्धचोरःकथितःपृथिव्यां ॥ अनेकजन्मार्जितपापसंचयंहरत्य

शेषंस्मृतमात्रएव ॥४९॥ यस्यसंस्मरणादेववासुदेवस्यचक्रिणः ॥ कोटिजन्मार्जितंपापंतत्क्षणादेवनश्यति
॥५०॥ किंतस्यबहुभिस्तीर्थैःकिंतपोभिःकिमध्वरैः ॥ योनित्यंध्यायतेदेवंनारायणमनन्यधीः ॥५१॥ येमा
नवाविगतरागपरावरज्ञानारायणंसुरगुरुंसततंस्मरंति ॥ ध्यानेनतेनहतकिल्बिषचेतनास्तेमातुःपयोधररसं
नपुनःपिबंति॥५२॥हेचित्तचिंतयस्वेहवासुदेवमहर्निशं॥नूनंयश्चिंतितःपुंसांहंतिसंसारबंधनं॥५३॥ आलो
ड्यसर्वशास्त्राणिविचार्यचपुनःपुनः॥ इदमेकंसुनिष्पन्नंध्येयोनारायणःसदा ॥५४॥ स्मृतेसकलकल्याणभा
जनंयत्रजायते ॥ पुरुषस्तमजंनित्यंव्रजामिशरणंहरिं ॥५५॥ वेदेषुयज्ञेषुतपस्सुचैवदानेषुतीर्थेषुव्रतेषुय
च्च ॥ इष्टेषुपूर्तेषुचयत्प्रदिष्टंपुण्यंस्मृतेतत्खलुवासुदेवे ॥५६॥ आराध्यैवनरोविष्णुंमनसायद्यदिच्छति ॥
फलंप्राप्नोतिविपुलंभूरिस्वल्पमथापिवा ॥५७॥ यन्नामकीर्तनंभक्त्याविलापनमनुत्तमं ॥ मैत्रेयाशेषपापानां
धातूनामिवपावकः ॥५८॥ कलिकल्मषमत्युग्रंनरकार्तिप्रदंनृणां ॥ प्रयातिविलयंसद्यःसकृत्संकीर्तितेच्युते
॥५९॥ अनायासेनचायांतिमुक्तिंकेशवसंश्रिताः ॥ तद्विघातायजायंतेशक्राद्याःपरिपंथिनः ॥६०॥ चतुः
सागरमासाद्यजंबूद्वीपोत्तमेक्वचित् ॥ नपुमान्केशवादन्यःसर्वपापचिकित्सकः ॥६१॥ यदभ्यर्च्यहरिंभक्त्या

कृष्णा० सःफलंहियत्तत्पदमच्युतस्य ॥ ८७॥ विष्णोर्विमानंयःकुर्यात्सकृद्भक्त्याप्रदक्षिणं ॥ अश्वमेधसहस्रस्यफलं महा०
॥ ४ ॥ प्राप्नोतिमानवः ॥८८॥ प्रदक्षिणंतुयःकुर्याद्धरिंभक्तिसमन्वितः ॥ हंसयुक्तविमानेनविष्णोर्लोकंसगच्छति
॥८९॥ तीर्थकोटिसहस्राणिव्रतकोटिशतानिच ॥ नारायणप्रणामस्यकलांनार्हंतिषोडशीं ॥९०॥ उरसा
शिरसादृष्ट्यामनसावचसातथा ॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोष्टांगईरितः ॥९१॥ शाठ्येनापिनमस्का
रंकुर्वतःशार्ङ्गपाणये ॥ शतजन्मार्जितंपापंनश्यत्येवनसंशयः ॥ ९२ ॥ संसारार्णवमग्नानांनराणांपापकर्म
णां ॥ नान्योद्धर्ताजगन्नाथंमुक्त्वानारायणंप्रभुं ॥९३॥ रेणुकुंठितगात्रस्यकणायावंतिभारत ॥ तावद्व
र्षसहस्राणिविष्णुलोकेमहीयते ॥९४॥ पावनंविष्णुनैवेद्यंसुभोज्यमृषिभिःस्मृतं ॥ अन्यदेवस्यनैवेद्यंभुक्त्वा
चांद्रायणंचरेत् ॥९५॥ कोट्यैंदवसहस्रैस्तुमासोपोषणकोटिभिः ॥ तत्फलंलभतेपुंभिर्विष्णोर्नैवेद्यभक्षणात्
॥९६॥ विष्णोर्नैवेद्यशेषेणयोभुनक्तिदिनेदिने ॥ सिक्थेसिक्थेलभेत्पुण्यंचांद्रायणशताधिकं ॥९७॥ नैवेद्य
शेषंतुलसीविमिश्रितंविशेषतःपादजलेनसिक्तं ॥ योश्नातिनित्यंपुरतोमुरारेःप्राप्नोतियज्ञायुतकोटिपुण्यं ॥७६१॥
॥९८॥ त्रिरात्रफलदानद्योयाःकाश्चिदसमुद्रगाः ॥ समुद्रगास्तुपक्षस्यमासस्यसरितांपतिः ॥९९॥ षण्मास

फलदागोदावत्सरस्यतुजाह्नवी ॥ विष्णुपादोदकस्यैताःकलांनार्हंतिषोडशीं ॥१००॥ गंगाप्रयागगयपुष्क
रनैमिषाणिसंसेवितानिबहुशःकुरुजांगलानि ॥ कालेनतीर्थसलिलानिपुनंतिपापंपादोदकंभगवतःप्रपुना
तिसद्यः ॥१०१॥ यानिकानिचतीर्थानिब्रह्मांडांतर्गतानिच ॥ विष्णुपादोदकस्यैताःकलांनार्हंतिषोडशीं
॥१०२॥ स्नात्वापादोदकंविष्णोःपिबन्शिरसिधारयेत् ॥ सर्वपापविनिर्मुक्तोवैष्णवींसिद्धिमाप्नुयात् ॥१०३॥
यथापादोदकंपुण्यंनिर्माल्यंचानुलेपनं ॥ नैवेद्यंधूपशेषश्चआरार्तिश्चतथाहरेः ॥१०४॥ तुलस्यास्तुरजोजुष्टं
नैवेद्यस्यचभक्षणं ॥ निर्माल्यंशिरसाधार्यंमहापातकनाशनं ॥ १०५ ॥ भक्त्यावायदिवाभक्त्याचक्रांकित
शिलांप्रति ॥ दर्शनंस्पर्शनंवापिसर्वपापप्रणाशनं ॥१०६॥ शालग्रामशिलायत्रतत्रसन्निहितोहरिः ॥ तत्र
स्नानंचदानंचवाराणस्याःशताधिकं ॥१०७॥ म्लेच्छदेशेशुचौवापिचक्रांकोयत्रतिष्ठति ॥ योजनानितथा
त्रीणिममक्षेत्रंवसुंधरे ॥१०८॥ शालग्रामोद्भवोदेवःशैलंचक्रांकमंडलं ॥ यत्रापिनीयतेतत्रवाराणस्याःशताधि
कं ॥१०९॥ शालग्रामोद्भवोदेवोदेवोद्धारवतीभवः ॥ उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः ॥११०॥ हरि
णामुक्तिदानीहिमुक्तिस्थानानिसर्वशः ॥ सयस्यसर्वभावेषुतस्यतैःकिंप्रयोजनं ॥ १११ ॥ हरिर्यातिहरिर्या

कृष्णा० तिदस्युव्याजेनयोवदेत् ॥ सोपिसद्गतिमाप्नोतिगतिंसुकृतिनोयथा ॥११२॥ वासुदेवंपरित्यज्ययोन्यंदेवमु महा°
॥५॥ पासते ॥ त्यक्त्वामृतंसमूढात्माभुंक्तेहालाहलंविषं ॥११३॥ त्यक्त्वामृतंयथाकश्चिदन्यपानंपिबेन्नरः ॥ त
थाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११४॥ स्वधर्मंतुपरित्यज्यपरधर्मंचरेद्यथा ॥ तथाहरिंपरित्यज्ययोन्यं
दैवमुपासते ॥ ११५ ॥ यथागंगोदकंत्यक्त्वापिबेत्कूपोदकंनरः ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते
॥११६॥ गांचत्यक्त्वासमूढात्मागर्दभींवंदतेयथा ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११७॥ स्वमात
रंपरित्यज्यश्वपाकींवंदतेयथा ॥ तथाहरिंपरित्यज्ययोन्यंदैवमुपासते ॥११८॥ वासुदेवंपरित्यज्ययोन्यंदैव
मुपासते ॥ तृषितोजाह्नवीतीरेकूपंखनतिदुर्मतिः ॥११९॥ यावत्स्वस्थमिदंपिंडंनिरुजंकरणान्वितं ॥ ता
वत्कुरुष्वात्महितंपश्चात्तापेनतप्यसे ॥१२०॥ यावत्स्वास्थ्यंशरीरेषुकरणेषुचपाटवं ॥ तावदर्चयगोविंदमा
युष्यंसार्थकंकुरु ॥१२१॥ स्मर्यतांतुहृषीकेशोहृषीकेषुदृढेषुच ॥ अदृढेषुहृषीकेषुहृषीकेशंस्मरंतिके ॥ १२२ ॥
यावच्चिंतयतेजंतुर्विषयान्विषसन्निभान् ॥ तावच्चेत्स्मरतेविष्णुंकोनमुच्येतबंधनात् ॥१२३॥ यावत्प्रलपते ॥७६२॥
जंतुर्लोकवार्तादिभिःसदा ॥ तावच्चेद्वदतेविष्णुंकोनमुच्येतबंधनात् ॥१२४॥ श्रीसूतः ॥ ज्ञात्वाविप्रैस्ति